स्फोटवादस्य भाषाशास्त्रीयं महत्त्वम्।।

Dr. Rajeev. P. P.

उपक्रमः

स्पोटवादो हि वैयाकरणानां प्रधानवादः। तेषां शब्दनित्यत्ववादस्य अयमेवास्ति महानाधारः। शब्दतत्त्वस्यैवान्वर्थं नाम स्फोट इति वैयाकरणाः। स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या , स्फुट्यते व्यज्यते वर्णैर्यः स इति व्युत्पत्त्या वा ध्वनिव्यङ्ग्यत्वे सत्यर्थप्रकाशकत्वमेव स्फोटत्वम्। 'स्फुटविकसने' इत्यस्मात्धातोः 'अकर्त्तरि च कारके संज्ञायाम्' इति सूत्रेण घञ् प्रत्यये सति 'स्फोट' शब्दो निष्पद्यते। कस्तावत् स्फोटतत्त्वस्य सर्वप्रथम आविष्कर्ता इति प्रश्ने विद्वत्सु पर्याप्तं वैमत्यमवलोक्यते। महाभाष्यकारः पतञ्जलिरेव स्फोटतत्त्वस्यादिम आविष्कर्तेति केचन[1] विद्वांसः स्वीकुर्वन्ति। परन्तु पाणिनेः पूर्वं स्फोटायनः स्फोटतत्त्वमाविश्चकार। हरदत्तमतानुसारेण स्फोटतत्त्वस्याविष्करणात्तस्य 'स्फोटायन' इति नामप्रसिद्धेः[2], अष्टाध्याय्यां पाणिनिना स्फोटायनाचार्यनामस्मरणाच्च[3]। स्फोटायनाचार्यस्य कोऽपि ग्रन्थः सम्प्रति नोपलभ्यते, येन पाणिनेः पूर्वं शब्दतत्त्वस्यार्थे स्फोटशब्दव्यवहारो ज्ञायेत। एवं यद्यपि पाणिनिना क्वचिदपि स्फोटशब्दस्य स्पष्टतया प्रतिपादनं न विहितं, तथापि पाणिनिसूत्ररचनाक्रमेण स्पष्टं प्रतीयते यत् पाणिनिरपि स्फोटतत्त्वज्ञ आसीत्। महाभाष्यकारेण पतञ्जलिनापि 'तपरस्तत्कालस्य[4]' प्रभृतिसूत्राणां रचनाक्रममाधारीकृत्यैव स्फोटतत्त्वम्प्रकाशितम्। तथा हि- 'स्फोटः शब्दः ध्वनिः शब्दगुणः। कथम्? भेर्याघातवत्। तद्यथा भेर्याघातः भेरीमाहत्य कश्चित् विंशति पदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव। ध्वनिकृता वृत्तिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।

अल्पो महांश्च केषाञ्चिदुभयं तत् स्वभावतः[5]।। इति।।

वैक्रमचतुर्थशतके समुत्पन्नः आचार्यो भर्तृहरिरपि व्याकरणशास्त्रस्य दार्शनिकं पक्षं समुपस्थापयन् स्फोटतत्त्वम्प्रकाशयामास। तस्य मते स्फोटः उत्पत्तिविनाशरहितो नित्यो

It can be precisely stated that the modern forms of art exploring several verbal and visual elements which were prohibited as unpresentable by Indian aestheticians are main causes of most crimes and illegal practices of contemporary society. They provoke the dormant needs of human mind repeatedly and force to respond to the stimulus through action. But the actions demanding by the emotional stimulations may be legally banned. So the individual cannot fulfill the urge from his internal organs. He will be in conflict and the symptoms of this conflict can be determined through the defense mechanism like dreams and several types of physical gestures. When the urge attacks over the defense mechanism, the individual lost his control and he acts in that way. If the individual has the ability and courage to control his mind and actions, he can overrule the stimulus and urge originated from the so called artistic elements. But unfortunately the society give least importance to the educational policy which primarily aims on the control of mind through the practices like Yoga and teachings of values. A terrible situation that has occurred these times is the society lose interest in literary education which soften the emotional background of the mind and intellect and accelerate the courage and capacity to overcome bad modifications of the internal sense organs.

Summing up, the elements of Indian aesthetics based upon Rasa system are also can be treated as the elements of Humanistic counseling as discussed in Gestalt theory. Both of them approach the human mind in a strategic way, helps to realize themselves and finally to overrule the emotions. Consistent practice in conventional poetry gives effect of continuous gestalt counseling. Aesthetic effort is not only substitute counseling but also acts as a defense element of life from the evil emotions.

ब्रह्मरूपः अखण्डवाक्यजातिस्फोटत्वेनाङ्गीक्रियते। 'शब्दस्योर्ध्वमभिव्यक्ते',[६] 'पदे न वर्णा विद्यन्ते',[७] 'अनेकशक्त्यभिव्यङ्ग्या'[८] इत्यादीनि अत्र उदाहरणानि भवन्ति। अतः स्फोट तत्त्वस्याद्याविष्कर्ता स्फोटायनाचार्यः, द्वितीयः संस्कर्ता भाष्यकारः पतञ्जलिः, तृतीयश्च संस्कर्ता आचार्यो भर्तृहरिरिति वक्तुं शक्नुमः।।

स्फोटवादः

ननु कोऽयं स्फोटः इति संशयनिवारणाय उच्यते- चतुर्विधा हि वागस्ति- परा, पश्यन्ती, मध्यमा, वैखरी च।[९] तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मस्वरूपा स्पन्दशून्या बिन्दुरूपिणी 'परा'वागुच्यते। नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता 'पश्यन्ती' वागुच्यते। एतद्द्वयं शब्दब्रह्मव्यञ्जकवाग् योगिनां समाधौ निर्विकल्पक-सविकल्पकज्ञानविषय इत्युच्यते। ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या 'मध्यमा' वागुच्यते। तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता 'वैखरी'वागुच्यते। तदुक्तम्-

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।

वैखर्या हि कृतो नादः परश्रवणगोचरः।

मध्यमया कृतो नादः परश्रवणागोचरः।।[१०] इति।

युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र मध्यमानादोऽर्थवाचकस्फोटात्मकशब्द व्यञ्जकः। वैखरीनादो ध्वनिः सकलजनश्रोत्रग्राह्यो भेर्यादिवन्निरर्थकः। किन्तु मध्यमानादः सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतर वायुव्यङ्ग्यः शब्दब्रह्मरूपस्फोट व्यञ्जकश्च। तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च। तदुक्तं हरिणा-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः[११]।। इति।

स च स्फोटः वर्ण-पद-वाक्यभेदेन त्रिधा। तत्रापि जाति-व्यक्ति भेदेन पुनः षोढा विभागः। अखण्डपदस्फोट-अखण्डवाक्यस्फोटभेदेन सङ्कलनया अष्टविधस्फोटाः भवन्ति। यद्यपि अष्टविधस्फोटाः भवन्ति तथापि आचार्यभर्तृहरिः अखण्डवाक्यस्फोटएव स्वीकरोति। तस्य मते पदेषु वस्तुतः वर्णाः न सन्ति। न च वर्णेषु ऐकारौकारगकारादिषु अवयवाः। अथ च वाक्यात् पदानामत्यन्तं प्रविकेकः भेदो न वर्त्तते। अर्थात् वाक्ये पदविभागद्वारा, पदे प्रकृतिप्रत्ययवर्णविभागद्वारा न वाच कत्वमपितुसमुदायशक्त्यावाक्यस्य वाचकत्वमित्य खण्डवाक्यस्फोटएव मुख्यः।।

स्फोटवादः भाषाशास्त्रञ्च।

स्फोटवादस्य भाषाशास्त्रीयं महत्वमधिकृत्य अत्र विचार्यते। महाभाष्य-वाक्यपदीय-वैयाकरणसिद्धान्तमञ्जूषादिग्रन्थानां पर्यालोचनेनेदं सुस्पष्टं भवति यद् वैयाकरणानां सम्प्रदाये स्फोटवादस्य समर्थनेन भाषाविज्ञाने अभूतपूर्वाः सिद्धान्ताः प्रकाशिताः इति। तेषां सिद्धान्तानां संक्षेपेणोल्लेखः अत्र क्रियते।

(क) ज्ञातमात्रेण सह शब्दव्यापारो भवति। पश्यन्, स्मरन्, अधीयानञ्च जनः स्वमनसि शब्दस्वरूपमवश्यं गृह्णाति। भ्रमे स्वप्ने वापि प्राणी वदत्येव यद्यपि वस्तु नास्ति।।

(ख). ज्ञानाय, प्रयोगाय वा वाक्यरूपशब्दोऽनिवार्यः। कदाचित् अध्याहारेणापि 'पिब', 'ग्रामम्', 'राम' आदि पदमात्रेण 'पिब जलम्', 'ग्रामं गच्छ','हे राम ! रक्ष' आदि वाक्यबोधो भवति।

(ग) प्रयोक्तार एव भाषास्वरूपनिर्धारणं कुर्वन्ति न तु लक्षणकर्तारः। यतः शब्दार्थ योर्नित्यसम्बन्धः अनादिरविच्छिन्नश्च।[१२] तदुक्तं- सर्वे सर्वार्थवाचकाः इति। वयं स्वक्षेत्रीयबोधानुसारं व्यवहारं कुर्मः, न सर्वज्ञाः।

(घ) अन्ये दार्शनिकाः पदार्थसापेक्षं शब्दज्ञानं कुर्वन्ति परं वैयाकरणाः तर्कनिरपेक्षबाह्य रूपमनपेक्ष्यैव शशश्रृङ्गवन्ध्यापुत्रादिपदानामर्थबोधं कुरुते।तदुक्तं नागेशभट्टेन-

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।

कूर्मक्षीरचये स्नातः शशश्रृङ्गधनुर्धरः [१३]।। इति।

अत्र वन्ध्याया सुतोत्पत्यभावात् तस्य यानक्रियायामन्वयस्य बाधः। आकाशे पुष्पाणां सर्वथाऽसम्भवेन तद्भूषणानां धारणमप्यसम्भवम्। एवं कूर्मपत्नीनां दुग्धस्यासम्भवेन तद्समुदाये स्नानासम्भवः। एवमेव सशश्रृङ्गाणामभावेन तद्धनुर्धारणासम्भवः। अत्र वन्ध्यासुतादीनां बाह्यार्थशून्यत्वेऽपि बुद्धिपरिकल्पितं वन्ध्यासुतशब्दवाच्यार्थमादायार्थवत्वात् प्रातिपदिकत्वम् इति। वस्तुतः बुद्धौ प्रतीयमानानां घटपटादिपदार्थानां न स्थितिः , किन्तु इन्द्रियमाध्यमेन बुद्धौ दर्पणप्रतिबिम्बवत् बाह्या घटपटाद्यर्थाः प्रकाशन्ते।।

(ङ) भाषाशास्त्रे बाह्यार्थस्योपस्थितिः तस्य ज्ञानं वा ईषदपेक्ष्यते नैवापास्यते। अत एव आम्रः फलविशेषः, सिन्धुवारं पुष्पविशेषः, कुसुमपुरं नगरविशेषः इति कथनेनापि बोधो जायत एव। 'एषु छात्रेषु को देवदत्तः' इति प्रश्ने 'यः पुस्तकी, कम्बली, गौरवर्णः स देवदत्तः' इत्युत्तरं सङ्गच्छते। श्रोता स्वबुद्धिस्थं देवदत्तं वक्तुः कथनेन सह सङ्गमय्य तं निर्णयति। अतीतेऽपि वर्तमानमिव पदार्थज्ञानं शब्दाभिन्नमेव जायते।

(च) बौद्ध एव शब्दार्थः इति वैयाकरणानां सिद्धान्तः। तदुक्तं नागेशभट्टेन-

"वस्तुतः बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धं, तयोस्तादात्म्यम्"[१४] इति। तेषां मते शब्दोऽपि बौद्धः अर्थोऽपि बौद्धः, न वक्ता वर्णसमूहरूपं पदं पदसमूहरूपं वाक्यं ब्रूते न च श्रोता तदनुसारं श्रृणोति, परं वक्ता अर्थबोधक मखण्डं वाक्यं ब्रूते श्रोता चाखण्डमेव तच्छ्रुत्वाऽर्थबोधं कुरुते[१५]। इमे ध्वनिरूपाः शब्दाः तस्याखण्डस्य शब्दार्थरूपस्य स्फोटस्याभिव्यञ्जकाः एव। अत एव अक्षराणि ध्वनिरूपाणि अक्षरेण ब्रह्मणा सह नामसादृश्यं लभन्ते। एवं-

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।"[१६]

इति श्रुतिवाक्येन शब्दस्य चतुर्विधस्य चतुर्थांशमात्रस्य लोकव्यवहारे दर्शनात् 'त्रिपादूर्ध्व उदैत् पुरुषः' इति पुरुषसूक्तीयमन्त्रेण सहैकत्वमपि सिद्ध्यति। तथा च वैयाकरणानां शब्दाद्वैतवादनामको दर्शनविशेषोऽपि मान्यतामर्हति। भाषाविज्ञानिनामयम ध्ययनविषयविशेषः। संसारस्याखण्डत्ववत् भाषाया अखण्डत्वमपि न तर्कसाध्यमपि तु समुदाये स्वीकृतिमात्रेण साध्यम्।।

(छ). यथा रूपात्मकं जगत् तथैव नामात्मकमपि वर्त्तते। इदं रूपात्मकं नामात्मकस्य विवर्तः। अतोऽर्थलाभाय न बाह्यरूपस्यावश्यकता विद्यते। सर्वे वर्णाः यथा संस्कृते तथैवापभ्रंशेष्वपि सन्ति अर्थबोधोऽपि सर्वत्र समान एव। परं व्याकरणशास्त्रेण सुसंस्कृतवाक्यरूपशब्दानुशासनक्रियते तेन सभ्यसमाजस्य विनिश्चितार्था प्रसन्न गम्भीरपदा वाणी सुष्ठु सम्यगर्थावगमायप्रभवति न तथा निरक्षराणामिति भाष्यसम्मतं रक्षोहागमलघ्वसन्देहाः प्रयोजनं सन्मान्यं भवति।।

(ज) शब्दनित्यत्ववादस्फोटसिद्धान्तस्वीकारेण, मन्त्राणां, स्तोत्राणां, तन्त्राणा च प्रामाणि कता स्थिरीकृता। अन्यथा उत्पत्तिविनाशशालिनां क्षणमात्रं स्थायिनां वर्णानां देवप्रसादने, विषविनाशे, रोगशमने वा कथं शक्तिः स्यात्। इमानि वचनानि ईश्वरोक्तानि इति कथनेन नित्यस्योरस्य नित्याएव शब्दा भवितुमर्हन्ति। काव्यस्यात्मा ध्वनिः, वाक्यं रसात्मकं काव्यम्,ब्रह्मानन्दसहोदरो रसः, रसो वै सः इति वाक्यानि शब्दनित्यत्ववादे एव सार्थकानि भवन्ति। शब्दानां चिरन्तनत्वं, चिरनवीनत्वं च स्फोटरूपं शब्दंसाधयति।।

उपसंहारः

उपर्युक्तैः विवरणैः शब्दो देशकालनिरपेक्षः स्वसापेक्षश्च सिद्धो भवति। वक्तृभेदेन, देशभेदेन, कालभेदेन भवेन्नाम, तस्य बाह्याकारपरिवर्त्तनं ध्वनिरूपं आभ्यन्तरं तु रूपमपरिवर्तितं नित्यमेव तिष्ठति। महाभाष्यकारः तमेव शब्दं ब्रह्मराशिं कथयति- 'वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते' इति। तथा च -'सोऽयमक्षरसमाम्नायो वाक्समाम्नायः

पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः' इति च। अत्र कैयट ः वदति- 'ब्रह्मतत्त्वमेव शब्दरूपतया भातीत्यर्थः' इति। भर्तृहरिश्च- ''यथैवेदमव्यवच्छिन्नं चन्द्रतारकादि एवमस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्ताऽस्ति एवमेव बेदपारम्पर्येण स्मर्यमाणः'' इति व्याख्यातवान्।।

उद्धरणसूची-

१. पण्डितरङ्गनाथपाठकः- स्फोटदर्शन्, प्रस्तावना, बिहार राष्ट्रभाषा परिषद्, पटना, १९६७.

२. 'स्फोटोऽयनं यस्य सः स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः'-हरदत्त-काशिका-६।१-१२३

सूत्रस्था पदमञ्जरी टीका।

३. अवङ् स्फोटायनस्य- पाणिनिः-अष्टाध्यायी-६-१-१२३.

४. तत्रैव-१-१-७०.

५. पतञ्जलिः- व्याकरणमहाभाष्यम्-तपरस्तत्कालस्य-१-१-७०-

इति सूत्रव्याख्याने- पृ-५६४.

६. भर्तृहरिः- वाक्यपदीयम्-ब्रह्मकाण्डम्-७७.

७. तत्रैव-७२.

८. तत्रैव-९३.

९. नागेशभट्टः-परमलघुमञ्जूषा-स्फोटनिरूपणम्-पृ-

१०. तत्रैव-पृ-

११. भर्तृहरिः- वाक्यपदीयम्-ब्रह्मकाण्डम्-१.

१२. नित्या शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।

सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः। इति। तत्रैव-२३.

१३. नागेशभट्टः- परमलघुमञ्जूषा- शक्तिनिरूपणम्-पृ-२९

१४. तत्रैव-पृ-२५

१५. ''पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।।'' भर्तृहरिः

वाक्यपदीयम्-ब्रह्मकाण्डम्-७३.

१६. ऋग्वेदसंहिता-१-१६४।४५।

सहायकग्रन्थसूची-

१. वाक्यपदीयम्-भर्तृहरिः, कृष्णदास् अकादमी- वाराणसी २२१००१, प्रथमं संस्करणम् १९८७.

Bibliography :

२. परमलघुमञ्जूषा- नागेशभट्टः, कृष्णदास् अकादमी, वाराणसी २२१००१, प्रथमं संस्करणम् -१९९७.

३. शब्दतत्त्वम्- डा. रामनारायणदासः, आनन्द प्रिन्टिंग् प्रेस्,जगतगंज, वाराणसी-२२१००१, १९९०.

४. स्फोटवादः- नागेशभट्टः, अडयार् लैब्ररि सीरिज्, अडय़ार्, मद्रास्, ६०००२० १९४६.

५. व्याकरणमहाभाष्यम्- पतञ्जलिः, चौखम्बा संस्कृत प्रतिस्थान् ३८, जवहर् नगर्, दिल्ली-११०००७, १९९२.,